# बाणभट्टः तस्य साहित्यकृतिश्च

## बाणभट्टः

चीनदेशोद्भवः प्राचीनः यात्री ह्येनत्सांगनामा ६२९ तः ६४५ ख्रीष्टीयवर्षपर्यन्तं भारतभ्रमणं कृतवान्। स हि स्वययात्रावर्णनप्रसङ्गे उत्तरभारतसम्राजः हर्षदेवस्य सविस्तरं वर्णनं कृतवान्। महाराजः हर्षदेवः ६०६ ईशवीयसमयाद् आरभ्य ६४८ पर्यन्तं थानेश्वरनामनि स्थाने राज्यं कृतवान्। स च अयं हर्षः बाणभट्टेन स्वीये हर्षचरिते सविशेषं वर्णितः। एतेन बाणभट्टस्य तत्समयवर्तित्वं प्रमीयते। तथा च बाणस्य समयः सप्तमशतकं सिद्ध्यति। बाणभट्ट वात्स्यायनवंशे जन्मग्रहणं कृतवान्। तस्य पूर्वजाः विहारप्रान्तस्थितस्य शोणाख्यस्य हिरण्यबाह्वपरनामकस्य महानदस्य तटे प्रीतिकूटनामके ग्रामे न्यवसन्। तस्य पिता चित्रभानुः, माता च राज्यदेवी आसीत्। देशभ्रमणं कृत्वापि यदा तस्य प्रज्ञायाः प्रकर्षभावः न जातः तस्मात् सः स्वगृहे अवस्थाय एव शास्त्राणाम् अध्ययने प्रवर्तितः आसीत्। श्रीहर्षनृपतिना कृते आह्वाने स तत्समीपं गतः। बाणस्य जीवनं दरिद्रतामयं नासीत्। तस्य समीपे पैतृकी सम्पत्तिः बाहुल्येन आसीत्। राजाश्रयलाभेनापि सः अनुदिनम् सम्पत्तिवृद्धिं कृतवान्। तस्मात् कवेः बाणस्य जीवनं सुखपूर्णमेव आसीत्।

बाणभट्टेन ग्रन्थद्वयमेव गद्यमयं प्रणीतम् – हर्षचरितम् कादम्बरी चेति।

## बाणस्य हर्षचरितम्

'करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम्' इति हर्षचरितोक्तदिशा हर्षचरितस्य आख्यायिकाग्रन्थरूपत्वं प्रतीतम्। नेदं साधारणं चरितपुस्तकम् अपि तु सरसं काव्यमिति वर्णनेषु सजीवताम् आनेतुम् अत्र प्रयासः कृतो वेद्यः। अत्र ग्रन्थे अष्टौ उच्छवासाः सन्ति। तत्र आद्ये उच्छवासत्रये बाणेन स्वीया कथा लिखिता। चतुर्थाद् उच्छवासात् आरभ्य समाप्तिपर्यन्तं हर्षस्य चरितं वर्णितम्। हर्षस्य पिता आसीत् प्रभाकरवर्धनः माता च यशोमती आसीत्। ज्येष्टो भ्राता राज्यवर्धनः स्वयं हर्षवर्धनः स्वसा राज्यश्रीः। चतुर्ते उच्छवासे राजकुमारयोः तत्स्वसुश्च जन्मवृत्तानि, पञ्चमे राजकुमारयोः विजययात्रा। हूणानां जयार्थं गते राज्यवर्धने हर्षे च मृगयां गते प्रभाकरवर्धनः मृतकल्पो जातः इति श्रुत्वा हर्षो मृगयातः निवृत्तः। षष्ठे उच्छवासे राज्यवर्धनस्य परावर्त्तनम्, ग्रहवर्मणो मृत्युः, राज्यश्रियो वन्दीभावः, राज्यश्रिय उद्धाराय राज्यवर्धनस्य प्रस्थानम्, गौडेश्वरशशाङ्कद्वारा तस्य वधश्च। सप्तमे हर्षस्य दिग्विजययात्रा, मालवेश्वरविजयः, अष्टमे राज्यश्रियः प्राप्तिः, दिवाकरमित्राख्यबौद्धभिक्षुणा सङ्गतिः। एवं ग्रन्थस्यास्य मूलकथा विस्तरेणात्र प्रतिपादिता दृश्यते।

'ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्' इति गद्यं विशेषयतामालङ्कारिकाणां मते गद्यलेखकानां मूर्धन्यः बाणः गद्यकाव्यानां प्रथमं च हर्षचरितम्। बाणः पाञ्चालीरितेः प्रधानः उपासकः आसीत् वक्तुं शक्यते। व्यञ्जनाप्रयोगे वक्रोक्तिरचनायां च बाणः सकलेषु कविषु मूर्धन्यः। अतएव एतन्न केवलम् उत्तमं गद्यकाव्यम्, अपि तु इतिहासदृष्ट्या अपि प्रशस्यतमम् इति दिक्॥

## बाणभट्टस्य कादम्बरी

कादम्बरी इति भवति बाणस्य कथाग्रन्थः। स्वयमेव कविना - 'धिया निबद्धेयमतिद्वयी कथा' इति कादम्बर्याः कथाग्रन्थत्वम् उक्तम्। कादम्बर्याम् उक्ता कथा गुणाढ्यकृताया बृहत्कथाया गृहीता। बृहत्कथातः नृपसुमनसः साधारणीं कथामादाय बाणभट्टः काव्यकलानैपुण्येन तस्यां विशेषान् उत्पाद्य कादम्बरीं निबद्धवान्।

विदिशायां शूद्रको नाम राजाऽसीत्। एकदा चाण्डालकन्यका एकं पञ्जरस्थं शुकं तस्मै उपाहरत्। नृपेण अगृहीतः सः शुकस्तस्मै स्वपूर्वजन्मकथाम् आख्यातवान्। जन्मकाले एव मम माता मृता, तातोऽपि लुब्धकैः मारितः, वृक्षादधः पतितं भूमौ सरन्तं मांजाबालिशिष्यान्यतमो दयया उत्थाप्य स्वगुरोः आश्रमं नीतवान्। जाबालिः मृद्वृत्तान्तम् इत्थम् अकथयत्। उज्जयिन्यां तारापीडो नाम राजा आसीत्, तस्य स्त्री विलासवती, शुकनासश्चामात्यः। प्रौढे वयसि नृपस्य पुत्रः चन्द्रापीडो नाम जातः। शुकनासो राजपुत्रं यथोचितमुपदिष्टवान्। दिग्विजयप्रवृत्तो राजकुमारः चन्द्रापीडः गन्धर्वमिथुनम् अधावन् एकं सरोऽच्छोदं दृष्टवान्। तत्र महाश्वेता नाम क्वापि सुन्दरी तपःप्रवृत्ता दृष्टा, या स्ववृत्तान्तमुक्तवती। मया पण्डरीकनामके मुनितनये स्नेहः कृतः, स लोकान्तरं गतः, तम् अनुमर्तुकामां मां कापि दिव्याङ्गना 'भूयोऽपि युवयोः सङ्गमो भावीति' मां विबोध्य तच्छरीरं लोकान्तरम् अनैषीत्। महाश्वेतैव चन्द्रापीडाय कादम्बरीवृत्तान्तम् उक्तवती। कादम्बरीचन्द्रापीडयोः साक्षात्कारं जाते द्वयोरनुराग उदियाय। तदैव पितुः दूते आगते चन्द्रापीडः स्वां राजधानीं प्रति निवृत्तः। कादम्बर्यां चन्द्रापीडविरहे देहं त्यक्तुम् उत्यतायाम् तत्सखी पत्रलेखा तां सान्त्वयित्वा चन्द्रापीडस्य समीपमागम्य तदवस्थां तस्मै न्यवेदयत्। एतावती कथा बाणेन लिखिता अग्रेतनी बाणपुत्रेण भूषणभट्टेन विरचिता।

कादम्बर्याः पात्रचित्रणम् अत्युत्तमम्। श्लेषेण, शब्दगुम्फनेन, रसवैचित्र्येण तथा अलंकारसन्निवेशेन च काव्यमिदम् अतीव समादृतम् आसीत्। तस्मात् बाणस्य रचनायाः प्रशंसां कुर्वन्नाह कविः धर्मदासः

"रुचिरस्वरवर्णपदा रसभाववति जगन्मनोहरति।

तत् किं तरुणी न हि न हि वाणी वाणस्य मधुरशीलस्य॥" इति शम्॥